राँचीविश्वविद्यालयस्य पीएच० डी० (संस्कृतम्) उपाधिप्राप्तये

प्रस्तावितं शोधप्रारूपम्

(मानविकी संकाय:)

स्नातकोत्तर-संस्कृतविभागः राँचीविश्वविद्यालयः,राँची

“ रघुवंशमहाकाव्ये क्रियापदानां व्याकरणात्मकमध्ययनम् ”

शोधनिर्देशिका

डॉ० मधुलिका वर्मा
सहायकप्राध्यापकः
संस्कृतविभागः
राँचीविश्वविद्यालयः, राँची

शोधार्थी

मलयकृष्ण-दासः
(यु.जी.सी –जे.आर.एफ)
राँचीविश्वविद्यालयः, राँची

विषयसूचिः

1.भूमिका

2.अनुसन्धानक्षेत्रम्

3. शोधकार्यसर्वेक्षणम्

4. शोधप्रविधिः

5. उद्देश्यानि

6.शोधविषयस्य प्रासङ्गिकत्वं महत्त्वं च

7.अध्ययनस्य विद्याक्षेत्रे सामाजिकक्षेत्रे च सम्भावितयोगदानम्

8.प्रस्तावितम् अध्याय-विभाजनम्

9. सन्दर्भग्रन्थ-सूचिः

“ रघुवंशमहाकाव्ये क्रियापदानां व्याकरणात्मकमध्ययनम् ”

भूमिका :

काव्यं खलु लोकोत्तरवर्णनाकुशलस्य कवेः मानसनिर्माणम् । यतः—

“अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ।।”

अतः, रसपरिवेषणैकलक्ष्यस्य कवेः भाषाप्रपञ्चस्य मानकः लौकिकसंवादात् भिन्न इति ज्ञेयः । सौन्दर्यनिरूपणाय अनुभूतप्रयोजनः सन् कविस्तु लोकव्यवहारम् अतिक्रम्यापि लक्ष्यं साधयतीति दृश्यते ।

महाकवि-कालिदासस्य रसोत्तीर्णा प्रतिभा संस्कृतसाहित्यभुवने अद्वितिया च मन्यते । संख्यया तस्य मूलग्रन्थाः यद्यपि केवलं सप्तैव उपलभ्यन्ते, परन्तु तेषु सप्तकेषु ह्येव तस्य प्रतिभा सर्वान् वै भव्य-काव्यगुणान् पूर्णतः समावेशयति, कलापक्षस्य भावात्मकपक्षस्य च अत्युत्तमम् एकीकृतरूपं चैव प्रदर्शयतीति सर्ववादिसम्मतं मतम् ।

व्याकरणं वै भाषायाः शुद्धतानिर्णायकं शास्त्रम् । व्याकरणं तु भाषायां प्रयुक्तानां शब्दानां दूषणं निवार्य तान् शुद्धरूपेण स्थापयितुं प्रयतते । यथा भर्तृहरिरुवाच—

“साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।”

यद्यपि, प्रतिभा कदाच जागतिक-नियमनिबद्धा न भवति, तथापि, पदरचनाकर्मणि तु शब्दज्ञानं सर्वज्ञानमूलमिति आनन्दवर्धनादयः अलङ्कारतत्त्वप्रणेतारोऽपि मन्यन्ते । अनयैव दृष्ट्या— कालिदासस्य रचनाशिरोमणौ नाम रघुवंशे क्रियापदानां प्रयोगव्यापारे कवेः कवित्वं कतिधा विन्यासितमासीत्, कथङ्कारं तत् सार्थकताविभूषितं च जातमिति अस्माकमस्य शोधकार्यस्य आशयो निर्धारितम् ।

अनुसन्धानक्षेत्रम् :

वयं तु रघुवंशमहाकाव्यमध्ये प्रयुक्तानां सर्वेषां क्रियापदानाम्, अर्थात्—आत्मनेपद-परस्मैपदोभयपद-धातूनां तिङन्तरूपाणि, कृदन्तरूपाणि च, तत्रत्य शुद्धधातवः, सन्नन्तधातवः, यङन्तधातवः, णिजन्तधातवः, नामधातवश्च इत्यादीनां यावत्पठितानां क्रियासम्बन्धि-विषयाणां सर्वेषामुपरि च समीक्षणीं दृष्टिं निधाय शोधकर्मास्माकं विस्तरिष्यामः।

सम्बन्धितानाम् अपरापरशोधकार्याणां सर्वेक्षणम् :

संस्कृतभाषासाहित्यादिविषये न केवलं भारतवर्षे, अपितु आविश्वं बहूनि शोधकार्याणि सुनिष्पन्नानि प्रचलन्त्यपि च सन्ति। कालिदासस्य कृतयस्तु गवेषकेभ्यो बहु रोचन्ते । वयं तावत् ऑनलाइन-माध्यमेन राँचीविश्वविद्यालयात् प्रारभ्य कलकत्ताविश्वविद्यालयः, यादवपुरविश्वविद्यालयः, पटनाविश्वविद्यालयः, श्रीलालबहादुरशास्त्री-विश्वविद्यालयः, इत्यादिषु सर्वत्र शोधसंग्रहशालासु यथाशक्ति अन्वेषितवन्तः ; परन्तु, एतत्-प्रस्तूयमाने विषये तु सन्तोषजनकं कोऽपि उद्योगः अस्माभिर्न दृष्टः कुत्रापि । अथतो वयं एनमेव अनालोचितप्रायं विषयं सविशदमालोकयितुं यथामति प्रयतिष्यामहे इति वासना।

अनुसन्धानप्रविधिः :

अद्यतने काले आधुनिकधारायां बहवः शोधप्रविधयः प्रचलिताः सन्ति । यथा—

१. समीक्षात्मकम् अध्ययनम्

२. विवेचनात्मकम् अध्ययनम्

३. तुलनात्मकम् अध्ययनम्

४. अन्तर्विभागीयम् अध्ययनम् इत्यादीनि ।

अस्माकं शोधस्य परिसरस्तु व्याकरणमुख्यो वर्तते । अतः बहुतरेषु प्रविधिषु समीक्षात्मक-प्रकारे अग्रेषिते ही शोधकर्मणानेन सूक्ष्मातिसूक्ष्मम् अर्थम् उद्घाट्य सत्यं प्रकटीकर्तुं सहायता भवेत्, शोधकर्तृणामपि ज्ञानं विवर्धिष्येत इति मत्वा प्रस्तावितमेतत् शोधकर्मास्माकं समीक्षात्मकमिति विविच्यतां विबुधैः ।

शोधस्य उद्देश्यानि :

१. काव्ये प्रयुक्तानां क्रियाणां अर्थ-व्युत्पत्त्यादि-विचारमार्गेण शोधोऽयं रघुवंशस्य एकैकस्या सूक्तेः तात्पर्यं समधिक-सार्थकतया प्रकाशितुम् अपर्याप्तां सम्भावनां द्योतयति ।

२. अस्य विषयस्य अध्ययनेन व्याकरणशास्त्रेण सह अलङ्कारशास्त्रस्यापि महत्त्वम् अधिकतरं स्पष्टं पुष्टं च भविष्यति ।

३. गतानुगतिकता-बहिर्भूता इयं गवेषणा कालिदासचर्चायां किञ्चन नूतनतरं वैज्ञानिक-युक्तिनिष्ठं च संयोजनम् उपहरिष्यति ।

४. असौ चर्चा भाषाविज्ञानविषयस्य विद्यार्थिनां भविष्यदध्ययनाय कमपि नवीनं पन्थानं प्रदर्शयिष्यति ।

शोधविषयस्य औचित्यं गुरुत्वं च :

अधुना-प्रकाशितान् सर्वान् शोधप्रबन्धान् अवलोक्य अस्माकं तु एष एव सिद्धान्तो निष्कृष्यते यत्, कालिदासस्य अस्मिन् महनीये रघुवंशमहाकाव्ये कतिचिद् एतावन्तः अभावितपुर्वा भाषाशास्त्रीयसन्दर्भाः सन्ति, ये खलु अनेकेषु सुविन्यस्तेषु प्रखण्डेषु विभज्य व्याख्यास्यन्ते चेत् तर्हि एतदनुसन्धानं शोभनतरं भविष्यति । व्युत्पत्तिपराणां प्रातिपदिकानां पक्षतः, एवं च क्रियापराणां तिङन्तानां कृदन्तानां पक्षतोऽपि वा सुष्ठु परीक्षणं कृतं चेत्, तदा कश्चिदेक उत्तमः शोधप्रबन्धः एतस्मात् महाकाव्याद् निश्चितमेव समुद्भावितुम् अर्हति । सर्वेष्वेव कविकृतिषु भाषाविषयिण्यः त्रुटयः न्यूनाधिकतया उपलभ्यन्ते इति सत्यम्, किन्तु, सर्वतन्त्रस्वतन्त्र-महाकवि-कालिदासस्य रचनासु निर्विचारेण कस्यापि प्रयोगस्य वैयाकरणिकी असङ्गतिः प्रदर्शयितुं न शक्यते । कवेरस्य श्लोकसम्भारः यतोऽपि शब्दसमष्टिमात्रमेव दृश्येत, परन्तु, अस्मिन् शब्दसागरे कृतेऽवगाहने सम्यगनुभूयते यत् एतदन्तःस्थानां क्रियापदानां महत्त्वं कतमं समुच्चं च गम्भीरम् ।

शैक्षणिक-सामाजिक-क्षेत्रेषु अध्ययनस्यास्य संभावितं योगदानम् :

शास्त्राणां सामूहिक-पठनावबोधनाय व्याकरणस्य भूमिका तु अनस्वीकार्या । व्याकरणं तु शब्दानां साधुतां सम्यक् प्रतिपादनेन वाङ्मयस्य पवित्रतां दृढीकृत्य प्रकृतं विषयावगाहि ज्ञानमधिगन्तुं मानवं मार्गनिर्देशं करोति । एवं पुनः, शुद्धैः समनुशिष्टैश्च शब्दैर्विनिर्मीयते सात्वतं सहित्यम्, यत्र तु कवेः क्रान्तदर्शिनी प्रज्ञा जगतः बुद्धिवृत्तिं परिमार्ष्टि । शोधोद्योगोऽयं व्याकरण-काव्यशास्त्रमुभयं पुरस्कृत्य अग्रसरः सन् सुष्ठु सिद्धन्तान् ज्ञापयितुं शक्नोति चेद्— एष न केवलं प्राच्यविद्यासमवायस्य, प्रत्युत सुधीसमाजस्यापि च मनन-परिपोषणाय उपदेयं भवेदिति अस्माकं भावना ।

प्रस्ताविता अध्याय-योजना :

भूमिका

आत्मनिवेदनम्

विषयानुक्रमणिका

प्रथमः अध्यायः

व्याकरणं तथा साहित्यम्

व्याकरणशास्त्रस्य प्राचीनता

व्याकरणे क्रियायाः दार्शनिकी समीक्षा

धात्वर्थविषयकं मतवैचित्र्यम्

द्वितीयः अध्यायः

क्रियायाः अर्थः

क्रियायाः स्वरुपम्

रघुवंशमहाकाव्ये प्रयुक्तानां क्रियाणां प्रकाराः

तृतीयः अध्यायः

रघुवंशे परस्मैपदीक्रियाणां विवेचनम्

उपसर्गरहितक्रियाः उपसर्गसहितक्रियाश्च

रघुवंशे आत्मनेपदीक्रियाणां विवेचनम्

उपसर्गरहितक्रियाः उपसर्गसहितक्रियाश्च

चतुर्थः अध्यायः

रघुवंशे प्रयोजक-क्रियाणां विवेचनम्
रघुवंशे उभयपदीक्रियाणां विवेचनम्
रघुवंशे अन्यासां क्रियाणां विवेचनम्

पञ्चमः अध्यायः

सन्नन्तधातवः, यङन्तधातवः, णिजन्तधातवः, नामधातवश्च
रघुवंशे कर्तृक्रिययोः सम्बन्धविवेचनम्
रघुवंशे कृदन्तक्रियाणां विवेचनम्
वाच्यानि, वचनानि, लिङ्गानि च

उपसंहारः

सन्दर्भग्रन्थसूचिः

धात्वर्थसूचिः

: सन्दर्भ- ग्रन्थ- सूचि: :

अष्टाध्यायी-भाष्य-प्रथमावृत्तिः ब्रह्मदत्त जी जिज्ञासु,
रामलाल कपूर ट्रस्ट, बहालगढ़,
सोनीपत, तृतीय संस्करण

अष्टाध्यायी-सूत्रपाठः (पाणिनिः) सम्पादक डा० रामरङ्गशर्मा,
भारतीय विद्याभवन, वाराणसी,
प्रथम संस्करण १९९८

धात्वर्थ-विज्ञानम् डा० भगीरथ प्रसाद त्रिपाठी,
सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी,
प्रथम संस्करण, १९९१

व्याकरण-महाभाष्यम् पतञ्जलिः, पस्पसाह्निकः, शास्त्री, चारुदेव (सम्पा०),
दिल्ली मोतीलालबनारसीदास, प्रथम नवानिक 2009
(पुनर्मुद्रणम्)

सिध्वान्त-कौमुदी (बालमनोरमा टी0) पं. गोपाल दत्त पाण्डेय। भाग-1 तथा
2 प्रकाशक- चौखम्बा सुभारती

संस्कृत-व्याकरण-प्रवेशिका डा. बाबूराम सक्सेना राम नारायण लाल
बेनीमाधव, प्रयाग।

वैयाकरणभूषणसार: डा. चन्द्रिका प्रसाद चतुर्वेदी ।व्र.प्रा भारती
ग्रन्थमाला, दिल्ली।

वैयाकरणभूषणसार: भाग-1 डा. भीमसेनशास्त्री मैमी प्रकाशन, दिल्ली।

वैयाकरण-सिद्धान्त-मञ्जूषा (कौण्डभट्टः) डा. कालिका प्रसाद। सम्पू. सं. वि. प्रकाशन, वाराणसी।

संस्कृत-व्याकरण-कौमुदी पं. ईश्वर चन्द्र विद्यासागर, भाग-1 से 4 एक विद्याभवन संस्कृत ग्रंथमाला, वाराणसी।

संस्कृत-व्याकरणोदयः डा. जयमंगल मिश्र विद्याभवन ग्रन्थमाला, वाराणसी।

Siddhant Kaumudi Principal S. Ray & Dr. K. Ray (in ten parts) Sanskrit Pustak Bhandar, Calcutta

निरुक्त: भाग-1 व 2 (**यास्कः**) पं. सीताराम शास्त्री परिमल पब्लिकेशन, दिल्ली।

शोधसरिता- Shodh Sanchar Educational and Research Foundation, ISSN-2348-2397

इंटरनेटवर्क-स्रोतः- www.shodhganga.inflibnet.ac.in
www.egranthalaya.nic.in

******आबश्यकतानुसारं तस्य बिस्तारःपरिबर्तनं च कर्तुंशक्यते |

------------********------------